## निवाते वातत्राणे। (८/३७४२)

निवातशब्दे उत्तरपदे[1] वातत्राणवाचिनि तत्पुरुषे समासे[2] पूर्वपदं प्रकृतिस्वरं भवति। कुटचेव निवातम् कुटीनिवातम्। शमीनिवातम्। कुडचनिवातम्। वातस्याभावो निवातम्, अर्थाभावः इत्यव्ययीभावः। निरुद्धो वातोऽस्मिन् इति वा निवातम् इति बहुव्रीहिः। [3]तत्र कुडचादिहेतुके निवाते कुडचादयो वर्तमानाः समानाधिकरणेन निवातशब्देन सह समस्यन्ते। कुटीशमीशब्दौ गौरादिङीषन्तावन्तोदात्तौ। कुडचशब्दोऽपि कवतेर्यत् डक्किच्च इति यत्प्रत्ययान्त आद्युदात्त इत्येके। डचक्प्रत्ययान्तोऽन्तोदात्तः इत्यपरे। वातत्राणे इति किम्? राजनिवाते वसति। सुखं मातृनिवातम्। निवातशब्दोऽयं पार्श्ववाची रूढिशब्दस्तत्रोभयत्र षष्ठीसमासः॥

## शारदेऽनार्तवे। (९/३७४३)

ऋतौ भवमार्तवम्। अनार्तववाचिनि शारदशब्दे उत्तरपदे तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। रज्जुशारदमुदकम्। दृषत्शारदाः सक्तवः। शारदशब्दोऽयं प्रत्यग्रवाची, तस्य नित्यसमासोऽस्वपदविग्रह इष्यते। सद्यो रज्जूद्धृतमुदकं प्रत्यग्रमनुपहतं रज्जुशारदमुच्यते। रज्जुशब्दः 'सृजेरसुम् च' (उ. १५) इति उप्रत्ययान्तः [4]आदिलोपश्च। 'धान्ये नित्' इति च तत्र वर्तते, तेनाद्युदात्तः। दृषत्शब्दः 'दृणातेः षुक् ह्रस्वश्च' (उ. १३६) इति अदिप्रत्ययान्तोऽन्तोदात्तः। अनार्तवे इति किम्? परमशारदम्। उत्तमशारदम्। [5]शरदि ऋतुविशेषे भवं यत् तदिह शारदम्॥

## अध्वर्युकषाययोर्जातौ। (१०/३७४४)

अध्वर्यु कषाय इत्येतयोः[6] जातिवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। प्राच्याध्वर्युः। कठाध्वर्युः। कलापाध्वर्युः। एते समानाधिकरणसमासाः जातिवाचिनो [7]नियतविषयाः। तत्र प्राच्यशब्दः यत्प्रत्ययान्त आद्युदात्तः। कठशब्दः पचाद्यचि [8]व्युत्पादितः। ततः कठेन प्रोक्तम् इति 'वैशम्पायनान्तेवासिभ्यश्च' (४.३.१०४/१४८४) इति णिनिः, तस्य 'कठचरकाल्लुक्' (४.३.१०७/१४८७) इति लुक्। कलापिना प्रोक्तम् इति 'कलापिनोऽण्' (४.३.१०८/१४८८), तस्मिन् 'इनण्यनपत्ये' (६.४.१६४/१२४५) इति प्रकृतिभावे प्राप्ते 'नान्तस्य[9] टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसङ्ख्यानम्' (वा. ४६९) इति टिलोपः। तदेवं [10]कलापशब्दोऽन्तोदात्तः। सर्पिर्मण्डकषायम्। उमापुष्पकषायम्। दौवारिककषायम्। [11]षष्ठीसमासव्युत्पादिता रूढिशब्दा एते। तत्र सर्पिर्मण्डशब्दः उमापुष्पशब्दश्च षष्ठीसमासावन्तोदात्तौ। दौवारिकशब्दोऽपि द्वारि नियुक्तः इति ठकि सत्यन्तोदात्तः एव। जातौ इति किम्? परमाध्वर्युः। परमकषायः॥

## सदृशप्रतिरूपयोः सादृश्ये। (११/३७४५)

सदृश प्रतिरूप इत्येतयोः उत्तरपदयोः सादृश्यवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। पितृसदृशः। मातृसदृशः[12]। पितृमातृशब्दावुणादिष्वन्तोदात्तौ निपातितौ। षष्ठीसमासार्थं [13]च [14]सदृशग्रहणम् इह तदलुकि

---

1. इति प्राप्ते इत्यधिकम् फ. 2. च इत्यधिकम् क. 3. तत्र नास्ति फ. 4. आदि नास्ति फ. 5. शरदि भवं शारदम् इत्यधिकम् ह. 6. उपपदयो इत्यधिकम् ब.ड.क.फ. 7. नियतविशेषाः क. 8. व्युत्पन्नः ह. 9. टेर्लोपे क. 10. कलापिशब्दो क. 11. षष्ठीसमासे एते रूढिताः ब. क. फ. ड. 12. पितृप्रतिरूपः, मातृप्रतिरूपः इत्यधिकम् ह. 13. च नास्ति फ. 14. सदृशपदग्रहणमेव ह.